# Shivastuti Shloka Sannayanam from Ribhugita

# ઋભુગીતાન્તર્ગતે શિવસ્તુતિશ્લોકસંનયનમ્

## Document Information

Text title : Shivastutishlokasannayanam 2 Collection of shivastutishloka-s

File name : shivastutishlokasaMnayanam2.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | shaNkarAkhyaH ShaShThAMshaH | various

Latest update : September 15, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 15, 2023

*sanskritdocuments.org*

# ઋભુગીતાન્તર્ગતે શિવસ્તુતિશ્લોકસંનયનમ્

(શિવરહસ્યે ષષ્ઠાંશે)
પિણ્ડાણ્ડસમ્ભવજગદ્ભતખણ્ડનોદ્યદ્વેતણ્ડશુણ્ડનિભપીવરબાહુદણ્ડ ।
બ્રહ્મોરુમુણ્ડકલિતાણ્ડજવાહબાણ કોદણ્ડભૂધરધરં ભજતામખણ્ડમ્ ॥ ૭.૫૧॥

વિશ્વાત્મન્યદ્વિતીયે ભગવતિ ગિરિજાનાયકે કાશરૂપે
નીરૂપે વિશ્વરૂપે ગતદુરિતધિયઃ પ્રાપ્નુવન્ત્યાત્મભાવમ્ ।
અન્યે ભેદધિયઃ શ્રુતિપ્રકથિતૈર્વર્ણાશ્રમોત્થશ્રમૈઃ
તાન્તાઃ શાન્તિવિવર્જિતા વિષયિણો દુઃખં ભજન્ત્યન્વહમ્ ॥ ૭.૫૨॥

- -

વેદાન્તૈરપિ ચન્દ્રશેખરપદામ્ભોજાનુરાગાદરા-
દારોદારકુમારદારનિકરૈઃ પ્રાણૈર્વનૈરુજ્ઝિતઃ ।
ત્યાગાદ્યો મનસા સકૃચ્છિવપદધ્યાનેન યત્પ્રાપ્યતે
તન્નૈવાપ્યતિ શબ્દતર્કનિવહૈઃ શાન્તં મનસ્તદ્ભવેત્ ॥ ૮.૮૪॥

- -

નિત્યાનન્દમયઃ સ એવ પરમાનન્દોદયઃ શાશ્વતો
યસ્માન્નાન્યદતોઽન્યદાર્તમખિલં તજ્જં જગત્સર્વદઃ ।
યો વાચા મનસા તથેન્દ્રિયગણૈર્દેહોઽપિ વેદ્યો ન ચે-
દચ્છેદ્યો ભવવૈદ્ય ઈશ ઇતિ યા સા ધીઃ પરં મુક્તયે ॥ ૯.૬૪॥

- -

યસ્મિન્સઞ્ચ વિચૈતિ વિશ્વમખિલં દ્યોતન્તિ સૂર્યેન્દવો
વિદ્યુદ્વહ્નિમરુદ્ગણાઃ સવરુણા ભીતા ભજન્તીશ્વરમ્ ।
ભૂતઞ્ચાપિ ભવત્યદૃશ્યમખિલં શમ્ભોઃ સુખાંશં જગ-
જ્જાતં ચાપિ જનિષ્યતિ પ્રતિભવં દેવાસુરૈર્નિર્યપિ (દેવાસુરૈરીતિતં)।
તન્નેહાસ્તિ ન કિઞ્ચિદત્ર ભગવદ્ધ્યાનાન્ન કિઞ્ચિત્પ્રિયમ્ ॥ ૧૦.૫૫॥

યઃ પ્રાણાપાનભેદૈર્મનનધિયા ધારણાપઞ્ચકાદ્યૈઃ

મધ્યે વિશ્વજનસ્ય સન્નપિ શિવો નો દૃશ્યતે સૂક્ષ્મયા ।
બુદ્ધ્યાદધ્યાતયાપિ શ્રુતિવચનશતૈર્દેશિકોક્ત્યૈકસૂક્ત્યા
યોગૈર્ભક્તિસમન્વિતૈઃ શિવતરો દૃશ્યો ન ચાન્યત્તથા ॥ ૧૦.૫૬॥

- -

યે વેદવાદવિધિકલ્પિતભેદબુદ્ધ્યા પુણ્યાભિસન્ધિતધિયા પરિકર્શયન્તઃ ।
દેહં સ્વકીયમતિદુઃખપરં પરાભિસ્તેષાં સુખાય ન તુ જાતુ તવેશ પાદાત્ ॥ ૧૧.૬૫॥

કઃ સન્તરેત ભવસાગરમેતદુધત્તરઙ્ગસદૃશં જનિમૃત્યુરૂપમ્ ।
ઈશાર્ચનાવિધિસુબોધિતભેદહીનજ્ઞાનોડુપેન પ્રતરેદ્ભવભાવયુક્તઃ ॥ ૧૧.૬૬॥

- -

અનાથ નાથ તે પદં ભજામ્યુમાસનાથ સ-
ન્નિશીથનાથ મૌલિસંસ્ફુટલ્લલાટસઙ્ગજ-
સ્ફુલિઙ્ગદગ્ધમન્મથં પ્રમથનાથ પાહિ મામ્ ॥ ૧૨.૬૧॥

વિભૂતિભૂષગાત્ર તે ત્રિનેત્રમિત્રતામિયાત્મનઃ-
સરોરુહં ક્ષણં તથેક્ષણેન મે સદા ।
પ્રબન્ધસંસૃતિભ્રમદ્ભ્રમજ્જનૌઘસન્તતૌ
ન વેદ વેદમૌલિરપ્યપાસ્તદુઃખસન્તતિમ્ ॥ ૧૨.૬૨॥

- -

સ્વતન્ત્રશક્તિર્ભગવાનુમાધવો વિચિત્રકાયાત્મકજાગ્રતસ્ય ।
સુકારણં કાર્યપરમ્પરાભિઃ સ એવ માયાવિતતોઽવ્યયાત્મા ॥ ૧૩.૬૧॥

- -

પૂર્ણં સત્યં મહેશં ભજ નિયતહૃદા યોઽન્તરાયૈર્વિહીનઃ
સો નિત્યો નિર્વિકલ્પો ભવતિ ભુવિ સદા બ્રહ્મભૂતો ઋતાત્મા (યતાત્મા) ।
વિચ્છિન્નગ્રન્થિરીશે શિવવિમલપદે વિદ્યતે ભાસતેઽન્તઃ
આરામોઽન્તર્ભવતિ નિયતં વિશ્વભૂતો મૃતશ્ચ ॥ ૧૪.૬૦॥

- -

ભુવનગગનમધ્યધ્યાનયોગાઙ્ગસઙ્ગે
યમનિયમવિશેષૈર્ભસ્મરાગાઙ્ગસઙ્ગૈઃ ।
સુખમુખભરિતાશાઃ કોશપાશાદ્વિહીના
હૃદિ મુદિતપરાશાઃ શામ્ભવાઃ શમ્ભુવચ્ચ ॥ ૧૭.૪૬॥

- -

વનનગભુવનં યચ્છઙ્કરાન્નાન્યદસ્તિ
    જગદિદમસુરાદ્યં દેવદેવઃ સ એવ ।
તનુમનગમનાદ્યૈઃ કોશકાશાવકાશે
    સ ખલુ પરશિવાત્મા દૃશ્યતે સૂક્ષ્મબુદ્ધ્યા ॥ ૧૮.૫૬॥

ચક્ષુઃશ્રોત્રમનોઽસવશ્ચ હૃદિ ખાદુદ્ભાસિતધ્યાન્તરા-
    ત્તસ્મિન્નેવ વિલીયતે ગતિપરં યદ્વાસના વાસિની ।
ચિત્તં ચેતયતે હૃદિન્દ્રિયગણં વાચાં મનોદૂરગં
    તં બ્રહ્મામૃતમેતદેવ ગિરિજાકાન્તાત્મના સંજ્ઞિતમ્ ॥ ૧૮.૫૭॥

- -

શાન્તિદાન્તિપરમા ભવતાન્તાઃ સ્વાન્તભાન્તમનિશં શશિકાન્તમ્ ।
અન્તકાન્તકમહો કલયન્તો વેદમૌલિવચનૈઃ કિલ શાન્તાઃ ॥ ૨૦.૫૮॥

- -

માયા સા ત્રિગુણા ગણાધિપગુરોરેણાઙ્કચૂડામણેઃ
    પાદામ્ભોજસમર્ચનેન વિલયં યાત્યેવ નાસ્ત્યન્યથા ।
વિદ્યા હૃદ્યતમા સુવિદ્યુદિવ સા ભાત્યેવ હૃત્પઙ્કજે
    યસ્યાનલ્પતપોભિરુગ્રકરણાદ્ભક્તસ્ય મુક્તિઃ સ્થિરા ॥ ૨૧.૫૫॥

- -

તં વેદાદિવચોભિરીડિતમહાયાગૈશ્ચ ભોગૈર્વ્રતૈ-
    ર્દાનૈશ્ચાનશનૈર્યમાદિનિયમૈસ્તં વિદ્વિષન્તે દ્વિજાઃ ।
તસ્યાનઙ્ગરિપોરતીવ સુમહાહૃદ્યં હિ લિઙ્ગાર્ચનં
    તેનૈવાશુ વિનાશ્ય મોહમખિલં જ્ઞાનં દદાતીશ્વરઃ ॥ ૨૨.૫૮॥

- -

સોમાપીડપદામ્બુજાર્ચનફલૈર્ભુક્ત્યૈ ભવાન્માનસં
    નાન્યદ્યોગપથા શ્રુતિશ્રવણતઃ કિં કર્મભિર્ભૂયતે ।
યુક્ત્યા શિક્ષિતમાનસાનુભવતોઽપ્યશ્માપ્યસઙ્ગો વચાં
    કિં ગ્રાહ્યં ભવતીન્દ્રિયાર્થરહિતાનન્દૈકસાન્દ્રઃ શિવઃ ॥ ૨૩.૫૬॥

- -

ભક્ત્યા પદ્મદલાક્ષપૂજિતપદધ્યાનાનુવૃત્ત્યા મનઃ
    સ્વાન્તાનન્તપથપ્રચારવિધુરં મુક્ત્યૈ ભવેન્માનસમ્ ।

સઙ્કલ્પોજ્ઝિતમેતદલ્પસુમહાશીલો દયામ્ભોનિધૌ
    કશ્ચિત્સ્યાચ્છિવભક્તધુર્યસુમહાશાન્તઃ શિવપ્રેમતઃ ॥ ૨૪.૫૩॥

- -

આર્તં યચ્છિવપાદતોઽન્યદિતરં તજ્જાદિશબ્દાત્મકં
    ચેતોવૃત્તિપરં પરાપ્રમુદિતં ષડ્ભાવસિદ્ધં જગત્ ।
ભૂતાક્ષાદિમનોવચોભિરનઘે સાન્દ્રે મહેશે ઘને
    સિન્ધૌ સૈન્ધવખણ્ડવજ્જગદિદં લીયેત વૃત્ત્યુજ્ઝિતમ્ ॥ ૨૫.૫૨॥

- -

એકત્વં ન બહુત્વમપ્યણુમહત્કાર્યં ન વૈ કારણં
    વિશ્વં વિશ્વપતિત્વમપ્યરસકં નો ગન્ધરૂપં સદા ।
બદ્ધં મુક્તમનુત્તમોત્તમમહાનન્દૈકમોદં સદા
    ભૂમાનન્દસદાશિવં જનિજરારોગાદ્યસઙ્ગં મહઃ ॥ ૨૬.૫૩॥

- -

શાખાદિભિશ્ચ શ્રુતયો હ્યનન્તાસ્ત્વામેકમેવ ભગવન્બહુધા વદન્તિ ।
વિષ્ણ્વિન્દ્રધાતૃરવિસૂન્વનલાનિલાદિ ભૂતાત્મનાથ ગણનાથલલામ શમ્ભો ॥ ૨૮.૨૭॥

- -

અઙ્ગાવબદ્ધાભિરુપાસનાભિર્વદન્તિ વેદાઃ કિલ ત્વામસઙ્ગમ્ ।
સમસ્તહૃત્કોશવિશેષસઙ્ગં ભૂમાનમાત્માનમખણ્ડરૂપમ્ ॥ ૨૯.૭૦॥

- -

સન્દેહસન્દેહકરોઽર્યકાસ્વકૈઃ કરાદિસન્દોહજગદ્વિકારિભિઃ ।
યો વીતમોહં ન કરોતિ દુર્હૃદં વિદેહમુક્તિં શિવદૃક્પ્રભાવતઃ ॥ ૩૦.૫૬॥

- -

ભવોદ્ભવમુખોદ્ભવં ભવહરાદ્યહૃદ્યં ભુવિ
    પ્રકૃષ્ટરસભાવતઃ પ્રથિતબોધબુદ્ધં ભવ ।
ભજન્તિ ભસિતાઙ્ગકા ભરિતમોદભારાદરા
    ભુજઙ્ગવરભૂષણં ભુવનમધ્યવૃન્દાવનમ્ ॥ ૩૧.૫૯॥

- -

ક્વ ભેદભાવદર્શનં ન ચૈવ શોકમોહહૃ-
    ત્પ્રપશ્યતાં શ્રુતે શિખાવિશેષમૈક્યભાવનાત્ ।
યતો ભવેજ્જગાદ તં મહેશ યેન જીવિતં

યદન્તરાઽવિશત્સદા યથોર્ણનાભતન્તુવત્ ॥ ૩૨.૫૨॥

- -

યસ્ત્વન્તકાન્તકમહેશ્વરપાદપદ્મ-
લોલમ્બસપ્રભહૃદા પરિશીલકશ્ચ ।
વૃન્દારવૃન્દવિનતામલદિવ્યપાદો
ભાવો ભવોદ્ભવકૃપાવશતો ભવેચ્ચ ॥ ૩૩.૫૧॥

- -

મનોવચોવિદૂરગં ત્વરૂપગન્ધવર્જિતં
હૃદર્ભકોકસન્તતં વિજાનતાં મુદે સદા ।
સદાપ્રકાશદુજ્વલપ્રભાવિકાસસદ્યુતિ
પ્રકાશદં મહેશ્વર ત્વદીયપાદપઙ્કજમ્ ॥ ૩૪.૩૪॥

- -

વિરિઞ્ચિવઞ્ચનાતતપ્રપઞ્ચપઞ્ચબાણભિ-
ત્સુકાઞ્ચનાદ્રિધારિણં કુલુઞ્ચનાં પતિં ભજે ।
અકિઞ્ચનેઽપિ સિઞ્ચકે જલેન લિઙ્ગમસ્તકે
વિમુઞ્ચતિ ક્ષણાદઘં ન કિઞ્ચિદત્ર શિષ્યતે ॥ ૩૫.૩૯॥

- -

સવ્યાસવ્યતયાધવજ્ઞહૃદયા ગોપોદહાર્યઃ સ્રિયઃ
પશ્યન્ત્યમ્બુજમિત્રમણ્ડલગતં શમ્ભું હિરણ્યાત્મકમ્ ।
સર્વત્ર પ્રસૃતૈઃ કરૈર્જગદિદં પુષ્ણાતિ મુષ્ણન્ધનૈઃ
ધૃષ્ટં ચૌષધિજાલમમ્બુનિકરૈર્વિશ્વોત્થધૂતં હરઃ ॥ ૩૭.૫૭॥

- -

લોકાલોકજગત્સ્થિતિપ્રવિલયપ્રોદ્ભાવસત્તાત્મિકા ભીતિઃ
શઙ્કરનામરૂપમસ્કૃદ્વ્યાકુર્વતે કેવલમ્ ।
સત્યાસત્યનિરઙ્કુશશ્રુતિવચોવીચીભિરામૃશ્યતે
યસ્ત્વેતત્સદિતીવ તત્ત્વવચનૈર્મીમાંસ્યતેઽયં શિવઃ ॥ ૩૮.૫૩॥

- -

અસઙ્કુલિતકાપિલૈર્મધુહરાક્ષિપૂજ્યામ્બુજ-
પ્રભાઙ્ઘ્રિજનિમોત્તમો પરિષિચેદ્યદિન્દુપ્રભમ્ ।
તં ડિણ્ડીરનિભોત્તમોત્તમ મહાખણ્ડાજ્યદધ્ના પરં

ક્ષીરાદ્યૈરભિષિચ્ય મુક્તિપરમાનન્દં લભે શામ્ભવમ્ ॥ ૪૦.૩૦॥

- -

કિં ચણ્ડભાનુકરમણ્ડલદણ્ડિતાનિ કાષ્ઠામુખેષુ ગલિતાનિ નમસ્તતીતિ ।
યાદૃક્ષ્ય તાદૃગથ શઙ્કરલિઙ્ગસઙ્ગભઙ્ગીનિ
 પાપકલશૈલકુલાનિ સદ્યઃ ।
શ્રીમૃત્યુઞ્જય રઞ્જય ત્રિભુવનાધ્યક્ષ પ્રભો પાહિ નઃ ॥ ૪૧.૪૬॥

- -

યત્પાદામ્બુજપૂજયા હરિરભૂદર્ચ્યો યદઙ્ઘ્ર્યર્ચના-
 દર્ચ્યોઽભૂત્ કમલા વિધિપ્રભૃતયો હ્યર્ચ્યા યદાજ્ઞાવશાત્ ।
તં કાલાન્તકમન્તકાન્તકમુમાકાન્તં મુહુઃ સન્તતં
 સન્તઃ સ્વાન્તસરોજરાજચરણામ્ભોજં ભજન્ત્યાદરાત્ ॥ ૪૨.૧૯॥

કિં વા ધર્મશતાયુતાર્જિતમહાસૌખ્યૈકસીમાયુતં
 નાકં પાતમહોગ્રદુઃખનિકરં દેવેષુ તુષ્ટિપ્રદમ્ ।
તસ્માચ્છઙ્કરલિઙ્ગપૂજનમુમાકાન્તપ્રિયં મુક્તિદં
 ભૂમાનન્દઘનૈકમુક્તિપરમાનન્દૈકમોદં મહઃ ॥ ૪૨.૨૦॥

યે શામ્ભવાઃ શિવરતાઃ શિવનામમાત્ર-
 શબ્દાક્ષરજ્ઞહૃદયા ભસિતત્રિપુણ્ડ્રાઃ ।
યાં પ્રાપ્નુવન્તિ ગતિમીશપદામ્બુજોદ્યદ્-
 ધ્યાનાનુરક્તહૃદયા ન હિ યોગસાઙ્ખ્યૈઃ ॥ ૪૨.૨૧॥

- -

અગાધ(બોધ)વેદવાક્યતો ન ચાધિભેષજં
 ભવેદુમાધવાઙ્ઘ્રિપઙ્કજસ્મૃતિઃ પ્રબોધમોક્ષદા ।
પ્રબુદ્ધભેદવાસનાનિરુદ્ધહૃત્તમોભિદે
 મહારુજાઘવૈદ્યમીશ્વરં હૃદમ્બુજે ભજે ॥ ૪૩.૪૦॥

દ્યતત્પ્રદગ્ધકામદેહ દુગ્ધસન્નિભં પ્રમુગ્ધસામિ ।
સોમધારિણં શ્રુતીડ્યગદ્યસંસ્તુતં ત્વભેદ્યમેકશઙ્કરમ્ ॥ ૪૩.૪૧॥

વરઃ કઙ્કઃ કાકો ભવદુભયજાતેષુ નિયતં
 મહાશઙ્કાતઙ્કૈર્વિધિવિહિતશાન્તેન મનસા ।
યદિ સ્વૈરં ધ્યાયન્નગપતિસુતાનાયકપદં
 સ એવાયં ધુર્યો ભવતિ મુનિજાતેષુ નિયતમ્ ॥ ૪૩.૪૨॥

કઃ કાલાન્તકપાદપદ્મભજનાદન્યદ્બુદા કષ્ટદાં
    ધર્માભાસપરમ્પરાં પ્રથયતે મૂર્ખો ખરીં તૌરગીમ્ ।
કર્તું યત્નશતૈરશક્યકરણૈર્વિન્દેત દુઃખાદિકં (દુઃખાધિકં)
    તદ્વત્સામ્બપદામ્બુજાર્ચનરતિં ત્યક્ત્વા વૃથા દુઃખભાક્ ॥ ૪૩.૪૩॥

- -

યઃ કોઽપિ પ્રસભં પ્રદોષસમયે બિલ્વીદલાલઙ્કૃતં
    લિઙ્ગં તુઙ્ગમપારપુણ્યવિભવૈઃ પશ્યેદથાર્ચેત વા ।
પ્રાપ્તં રાજ્યમવાપ્ય કામહૃદયસ્તુષ્યેદકામો યદિ
    મુક્તિદ્વારમપાવૃતં સ તુ લભેચ્છમ્ભોઃ કટાક્ષાઙ્કુરૈઃ ॥ ૪૮.૨૯॥

અચલાતુલરાજકન્યકાકુચલીલામલબાહુજાલમીશમ્ ।
ભજતામનલાક્ષિપાદપદ્મં ભવલીલં ન ભવેત ચિત્તબાલમ્ ॥ ૪૮.૩૦॥

- -

॥ ઇતિ ઋભુગીતાન્તર્ગતે શિવસ્તુતિશ્લોકસંનયનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । શઙ્કરાખ્યઃ ષષ્ઠાંશઃ । સંનયનમ્ । ॥

- .. shrIshivarahasyam . shankarAkhyaH ShaShThAMshaH . various . ..

Selected Shiva Stuti Shlokas collated from various Adhyaya-s of SR Amsa06
Notes :
Shiva Rahasyam Amsa-06 consists of the
50 Adhyaya-s that comprise the Ribhu Gita.
The shlokas composed or spoken by Ribhu,
Skanda, Suta et al for eulogizing Shiva;
that eventuate sporadically in various
Adhyaya-s of Shiva Rahasyam Amsa-06,
are collated on this page.

Proofread by Ruma Dewan

*Shivastuti Shloka Sannayanam from Ribhugita*

pdf was typeset on September 15, 2023

Please send corrections to *sanskrit@cheerful.com*